The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

# विद्यासागरकृतव्याकरणकौमुद्यां कारकविधाने पाणिनीयप्रभावः

**डॉ. हरिपदवेरा**

*सहायकाचार्यः, भारतीयज्ञानपरम्परा, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली*

Email: sanskritharipada@gmail.com

*Received* 21/06/2025

*Accepted* 26/06/2025

*Published* 04/07/2025

**प्रबन्धसारः**

*पुरा बहूनि शब्दशास्त्राण्यासन्।' तेषु सर्वेषु व्याकरणेषु पाणिनीयव्याकरणं महत्वपूर्णं सर्वोपकारकं च। अतएव सर्वेष्वपि व्याकरणेषु प्रातिशाख्येषु च लोकवेदसाधारणतया मूर्धन्यतमं पाणिनीयव्याकरणम्। अन्येषु व्याकरणेषु न्यूनतां त्रुटीश्च परिलक्ष्य अष्टाध्यायीनाम्ना स्वतन्त्रव्याकरणं पाणिनिना विरचितम्। अष्टसु अध्यायेषु द्वात्रिंशत् पादेषु प्रायेण च चतुःसहस्रसंख्याकेषु च सूत्रेषु सन्ति निबद्धाः संस्कृतभाषाव्याकरणनियमाः। भाषां स्थिरीकर्तुं नियन्त्रयितुं च इदं व्याकरणं सर्वश्रेष्ठम्।*

*परिवर्त्तमानेऽस्मिन् संसारे पठनपाठनादिक्रमेऽपि परिवर्त्तनं स्वाभाविकमापतितम्। अष्टाध्यायी क्रमेण शब्दशास्त्रस्य ज्ञानाय महानायासो भवति। अतः सौकार्येण अध्ययनज्ञानाय परम्परागतपद्धतिस्थकाठिन्यदूरीकरणाय आञ्चलिकभेदेन नैके विद्वांसः नैके व्याकरणग्रन्थाः व्यरचयन्। तत्र अन्यतमानुपमो ग्रन्थो वर्त्तते ईश्वरचन्द्रविद्यासागरकृतव्याकरणकौमुदी। ग्रन्थेऽस्मिन्, तत्रापि विशिष्य कारकविधाने पाणिनीयप्रभावः किदृशः दरीदृश्यते तदाधारीकृत्य "ईश्वरचन्द्रविद्यासागरकृतव्याकरणकौमुद्यां कारकविधाने पाणिनीयप्रभावः" इति शीर्षकाख्य निबन्धोऽयं प्रवृत्तः।*

**मुख्यशब्दाः** *भगवान् पाणिनिः, ईश्वरचन्द्रविद्यासागरः, व्याकरणकौमुदी, कारकम्, विभक्तिः, व्याकरणम्, कर्त्तृकारकम्, कर्मकारकम्, करणकारकम्, सम्प्रदानकारकम्, अपादानकारकम्, अधिकरणकारकादयः शब्दाः निबन्धेऽस्मिन् प्रामुख्यं भजन्ते।*

## प्रस्तावना

भाषासु प्रयुज्यमानानां शब्दानां तेषु तेषु अर्थेषु शक्तिग्रहो यावन्त बोद्धृणां समुपजायते तावन्न तेषां शाब्दबोधः सम्भवति। तथा चोक्तम् -

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।[1]

सत्स्वपि बहुषु शक्तिग्राहकेषु देवगीरोऽस्या व्याकरणमेवेदानीं मुख्यं शक्तिग्राहकमवशिष्यते। अत एवोक्तम् -

शक्तिग्रहो व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।

[1] कारिकावली, शब्दखण्डम्, पृ. सं.-69


***All rights reserved. © 2025***

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।[2]

अत्र व्याकरणमेव प्रमुखतया अभ्यार्हितत्वादादौ पठ्यते। व्याकरणशास्त्रेऽस्मिन् भगवान् पाणिनिः 'कारके'[3] इति सूत्रेण कारकसंज्ञां प्रयच्छति। तत्र सः कारकस्य अर्थं न प्रयच्छति। एतदर्थं परवर्तीकाले कारकविषये अनेकानि लक्षणानि प्राप्यन्ते। सन्दर्भेऽस्मिन् विद्यासागरः 'क्रियान्वयि कारकम्' इति सूत्रेण कारकस्य स्पष्टलक्षणं कृतम्। विद्यासागरेण तु 'षट् कारकाणि' इति सूत्रेण स्पष्टं कृतम्। क्रमेण तेषां विधानं ससूत्रमालोच्यते।

**कर्तृकारकम्**

कर्तुः संज्ञाप्रदाने महर्षिपाणिनिना लक्षणद्वयं प्रणितम्। तद्यथा-

1. 'स्वतन्त्रःकर्त्ता'[4]।

2.'तत्प्रयोजकोहेतुश्च'[5]।

अतः पाणिनेरभिमतं भवति कर्त्ताऽयं द्विविधः

1. स्वतन्त्रकर्त्ता 2. प्रयोजककर्त्ता हेतुकर्त्ता वा।

अस्याः संज्ञायाः विषये विद्यासागरः सूत्रद्वयं चकार।

1. 'क्रियासम्पादकः कर्त्ताः 2. 'प्रयोजकश्च' ।

अतः विद्यासागरः पाणिनेरभिमतं भिन्नसूत्रेण समर्थितम्।

**कर्मकारकम्**

पाणिनीये व्याकरणे दशसंख्यकसूत्राणि कर्मकारकसम्बन्धानि एकादशसंखकवार्तिकानि च प्राप्यन्ते। विद्यासागरस्य व्याकरणकौमुद्यां एकादशसंख्यकसूत्राणि उपलभ्यन्ते। तेषु षट्संख्यकसूत्राणि पाणिनेः सूत्राणां रूपान्तरमेव। यथा-

| पाणिनिः | विद्यासागरः |
|---|---|
| **1. क्रुधद्रुहोरुपसृष्टयोः कर्म 1-4-38** | 1. कुधद्रुहोरुपसृष्टयोः सम्प्रदानम् |
| **2. अधिशीङ्स्थाऽऽसां कर्म 1-4-46** | 2. अधिशीस्थासामधिकरणम् |
| **3. अभिनिविश्श्च 1-4-47** | 3. अभिनिविशो विभाषा |
| **4. उपान्वध्याङ् वसः 1-4-48** | 4. उपान्वध्यङ् वसः |
| **5. अकथितञ्च 1-4-51** | 5. द्वे कर्मणी दुहादेः |
| **6. दिवः कर्म च 1-4-43** | 6. बिभाषा दिवः करणम् |

[2] न्या. सि. मु., पृ-8 (न्यायसिद्धान्तमुक्तावली)
[3] पा.सू.- 1-4-23
[4] पा. सू-1/4/54
[5] Ibid-1/4/55

Published By: Atasi Publisher
All rights reserved. © 2025

पाणिनेः 'कर्तुरीप्सिततमं कर्म'[6] 'तथायुक्तं चानीप्सितम्'[7] सूत्रद्वयं विद्यासागरः 'क्रिययाक्रान्तं कर्म' इत्येकेन सूत्रेण व्यवस्थापयति। पाणिनेः 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ'[8] सूत्रं विद्यासागरः 'गत्यर्थानां कर्मसंज्ञा प्रयोज्यस्य' 'ज्ञानाशनार्थानाञ्च' 'शब्दकर्मकाणामकर्मकाणाञ्च' सूत्रत्रयेन व्याख्यानं चकार। किन्तु विद्यासागरः कात्यायनस्य कर्मकारकविषये एकादशवार्तिकसम्बन्धे मौनमाचरति।

**करणकारकम्**

करणकारकार्थं पाणिनेः एकं सूत्रं 'साधकतमं करणम्'[9] एकं वार्तिकं 'यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' अस्ति। विद्यासागरः केवलं 'साधकतमं करणम्' इति पाणिनेः अनुरूपं सूत्रं कृतवान्।

**सम्प्रदानकारकम्**

विद्यासागरः सम्प्रदानकारकार्थं सप्तसंख्यकसूत्राणि व्यरचयत्। तेषु 'रूच्यर्थानां प्रीयमाणः' 'धारेरूत्तमर्णः' 'स्पृहेरीप्सितः' सूत्रत्रयं पाणिनेः सूत्रस्य यथारूपम्। 'यस्मै दानं सम्प्रदानम्' 'क्रोधद्रोहेर्व्यासूयार्थानां तदुद्देश्यः' 'प्रत्यादभ्यां श्रुवः प्रवर्तकः' सूत्रत्रयं यथाक्रमेण 'कर्मणा यमभिप्रैति स सम्प्रदानम्'[10] क्रुधद्रुहेर्व्याऽसूयार्थानां यं प्रति कोपः'[11] 'प्रत्यादभ्यां श्रुवः पूर्वस्यकर्ता[12] सूत्राणां रूपान्तरम्। 'क्रियया यमभिप्रैति' सूत्रं 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' इति वार्तिकस्य रूपान्तरम्। किन्तु पाणिनेः 'राधीक्ष्योर्यस्य विप्रश्नः'[13] 'श्लाघह्नुस्थाशपां ज्ञीप्स्यमानः'[14] 'अनुप्रतिगृणश्च'[15] 'परिक्रयेण सम्प्रदानमन्यतरस्याम्'[16] सूत्रविषये विद्यासागरः किमपि नोक्तवान्।

**अपादानकारकम्**

अपादानकारकार्थं विद्यासागरः चतुर्दशसंख्यकसूत्राणि प्रयच्छति। तेषु सूत्रेषु 'भ्रीत्रार्थानां भयहेतुः' 'वारणार्थानामीप्सितः' सूत्रद्वयं पाणिनेः 'भीत्रार्थानां भयहेतुः[17] 'वारणार्थानामीप्सितः[18] सूत्रयोः यथारूपम्। पञ्चसूत्राणि पाणिनेः सुत्राणां रूपान्तराणि। यथा-

| पाणिनिः | विद्यासागरः |
|---|---|
| **1. ध्रुवमपायेऽपादानम् 1-4-24** | 1. यतो विश्लेषोऽपादानम् |
| **2. पराजेरसोढः 1-4-26** | 2. पराजेरसह्यम् |
| **3. अन्तधौ येनादर्शनमिच्छति 1-4-28** | 3. यस्यादर्शनमिच्छति |
| **4. जनिकर्तुः प्रकृतिः 1-4-30** | 4. हेतुरुत्पत्तेः |
| **5. भुवः प्रभवः 1-4-31** | 5. आविर्भवनभूर्भुवः |

[6]पा.सू-1-4-49
[7]तत्रैव-1-4-50
[8]तत्रैव -1-4-52
[9]तत्रैव -4-42
[10]पा.सू-1-4-32
[11]पा.सू-1-4-37
[12]पा.सू-1-4-40
[13]पा.सू-1-4-39
[14]पा.सू-1-4-34
[15]पा.सू-1-4-41
[16]पा.सू-1-4-44
[17]पा.सू-1-4-25
[18]पा.सू-1-4-27

Published By: Atasi Publisher
All rights reserved. © 2025

'अधीत्यर्थानामध्यापयिता' 'श्रुत्यार्थानां श्रावयिता' 'ग्रहणप्राप्त्यर्थानां तत्स्थानम्' सूत्रत्रयं पाणिनेः 'आख्यातोपयोगे'[19] सूत्रस्य रूपान्तरम्। 'विरामार्थानां यतो विरतिः' 'यतो जुगुप्सा तदर्थानाम्' 'प्रमादार्थानां यतः प्रमादः' सूत्रत्रयं 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्तिकस्य सूत्ररूपम्। विद्यासागरः 'त्रपार्थाना यतस्त्रपा' नवरूपेण सूत्ररूपं चकार।

**अधिकरणकारकम्**

विद्यासागरः अधिकरणकारककार्थं पाणिनेः अनुरूपम् 'आधारोऽधिकरणम्' एकं सूत्रं प्रयच्छति।

**परिशीलितग्रन्थसूची**

१. अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान, 38 यू.ए. जवारनगर, बंगलो रोड, पो.बा.नं.2113, दिल्ली-110007।
२. पाणिनीयव्याकरणस्य भाषावैज्ञानिकाध्ययनम्, डॉ. शशिभूषणमिश्रः, वनारस मर्केन्टाइल कम्पानी, 125, महात्मा गांधी रोड, कोलकाता, 7000071
३. महाभाष्यम्-प्रो. जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी।
४. मुग्धबोधं व्याकरणम्-जीवानन्द विद्यासागरः, चौखम्बा विद्याभवन, वाराणसी।
५. विद्यासागर रचनावली-सुवोध चक्रवर्ती, कामिनी प्रकाशनालय, नवीनचन्द्र पाल लेन. कलकाता-7000091
६. व्याकरण दर्शनेर इतिहास- श्रीगुरुपद हालदार, संस्कृत वुक डिपो, 28/1, विधान सरणी, कलकाता-700006।
७. संस्कृत व्याकरणशास्त्र का इतिहास युधिष्टिर मीमांसक, रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत (हरयाणा) 1310211
८. समग्र व्याकरण कौमुदी-महामहोपाध्यायः श्रीयुक्तः दुर्गाचरण सांख्यवेदान्ततीर्थः, आशुतोष देव, श्री अरुणचन्द्र मजुमदार, देव साहित्य कुटीर प्राइभेट लिमिटेड, 21. झामापुकुर लेन, कलिकाता -9।
९. समग्र व्याकरण कौमुदी-श्रीहरलाल वन्द्योपादध्यायः, संस्कृत वुक डिपो, 28/1, विधान सरणी, कलकाता-700006।
१०. सिद्धान्तकौमुदी (कारकप्रकरण)-डाः सच्चिदानन्द मुखोपाध्यायः, साहित्य निकेतन, के 3/10, मार्कास स्कोयार, कलकाता-7।
११. सिद्धान्त-कौमुदी- कविराज श्रीविनोदलाल सेन, श्रीवलराम प्रकाशनी, 101 वि, विवेकानन्द रोड, कलकाता-700006।
१२. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननभट्टाचार्यः, चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, 1881

[19] पा.सू-1-4-29


All rights reserved. © 2025